न्येन कारयेत् क्रियते सदा"। उपवासाशक्तौ नक्तं भोजनं कुर्य्यात् "उपवासे त्वशक्तानां नक्तं भोजनमिष्यते" इति तद्व्रतवचनान्तरात्। अशुद्धा चेत् पूजां कारयेत्। कायिकश्चोपवासादिकं सदा शुद्धया अशुद्धया च स्वयं क्रियते। एवं स्मृतिपरिभाषिकायां वर्द्धमानोपाध्यायाः। नारदः "दिवाभागे त्रयोदश्यां यदा चतुर्दशी भवेत्। तत्र पूज्या महासाध्वी देवी-सत्यवता सह"। दिवाभागे दण्डद्वयमात्रसत्त्वेऽपि अतएव प्रदोषे व्रतमाचरन्ति। पूर्वाह्णे तद्विधत्वेऽपि। पराह्णे त्रिसन्ध्यव्यापित्वे पराह्ण एव त्रिसन्ध्यव्यापिनीति वचनात्। यदा तु पूर्वपरयोर्न तथाविधा तदापि पराह्ण एव यथा ज्योतिषे "चतुर्दश्याममावास्या यदा भवति नारद!। उपोष्या पूजनीया सा चतुर्दश्यां विधानतः"। सा सावित्री। ततश्चामावास्यायां सावित्रीव्रतविधानं शिवाघोरेति वचनञ्च तत्परम्। पराशरः "सावित्रीमर्चयित्वा तु फलाहारा परेऽहनि। ततश्चाविधवा नारी चित्तभोगान् लभेत सा"।

**सावित्रीसूत्र** न० सावित्रीदीक्षाकालिकं सूत्रम् शाक०। यज्ञोपवीते पद्धच०।

**साश्रुधी** स्त्री साश्रु ध्यायति ध्यै-क्विप् सम्प्र०। श्वश्र्वाम् त्रिका०

**सास्ना** स्त्री० सस-न नित्। गोगलस्थिते लोमसंघातात्मके कम्बले अमरः।

**सास्र** त्रि० सह अस्रेण। चक्षुर्जलान्विते।

**सास्थिताम्रार्द्र** न० सास्थि अस्थिसहितं ताम्रार्द्रं यत्र। कांस्ये त्रिका० तस्य रक्तवर्हितताम्रार्द्रजातत्वात् तथात्वम् साहिताम्रार्द्र इत्येव पाठः सम्यक् अहिनीगो रक्तः

**साहचर्य्य** न० सहचरस्य भावः ष्यञ्। १समभिव्याहारे, २साहित्ये ३सामानाधिकरण्ये च।

**साहस** न० सहसा बलेन निर्वृत्तम् अण्। १बलेन कृते चौर्य्य-स्त्रीसंग्रहादौ दुष्कर्मणि, "सहसा क्रियते यत्तु तत् साहसमिति स्मृतमिति" स्मृतिः। तद्भेदादि वीरमि० "तस्य स्वरूपमाह नारदः "सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः। तत्साहसमिति प्रोक्तं सहो-बलमिहोच्यते" इति। तस्य चातुर्विध्यमाह बृहस्पतिः "मनुष्यमारणञ्चौर्य्यं परदाराभिमर्षणम्। पारुष्यमुभयञ्चेति साहसं स्याच्चतुर्विधम्" इति। उभयं पारुष्यं वाग्दण्डपारुष्ये। तस्य त्रैविध्यमाह नारदः "तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमन्तथा। उत्तमञ्चेति शास्त्रेषु तस्योक्तं लक्षणं पृथग्" इति। एतेषां स्वरूपमाह स एव "फलमूलोदकादीनां क्षेत्रोपकरणस्य च। भङ्गाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतम्। वासःपश्वन्नपानानां गृहोपकरणस्य च। एतेनैव प्रकारेण मध्यमं साहसं स्मृतम्। व्यापादो विषशस्त्राद्यैः परदाराभिमर्षनम्। प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम्" इति। भङ्गः फलादिस्वरूपनाशनम्। आक्षेप आक्रोशः वाकतिरस्करण-मिति यावत्। उपमर्दः स्वरूपावशेषेण पीडनम्। एतेनैव प्रकारेणेत्यर्थः। त्रिविधेऽपि साहसे दण्ड-माह नारदः "तस्य दण्डः क्रियापेक्षः प्रथमस्य शतावरः। मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः। उत्तमे साहसे दण्डः सहस्रावर इष्यते। बधः सर्वस्वहरणं, पुरान्निर्वासनाङ्कने। तदङ्गच्छेद इत्युक्तो दण्ड उत्तम-साहसे" इति। ब्राह्मणस्य तु महत्यपराधे शारीर-दण्डाभावमाह स एव "अविशेषेण सर्वेषामेष दण्ड-विधिः स्मृतः। बधादृते ब्राह्मणस्य न बधं ब्राह्मणो-ऽर्हतीति"। यमोऽपि "न शारीरो ब्राह्मणस्य दण्डो-भवति कस्यचित्" इति। महत्यपराधे ब्राह्मणस्य दण्डमाह स एव "चिता तु बन्धने बद्ध्वा राजा भक्तं प्रदापयेत्" इति। नारदोऽपि "शिरसो मुण्डनं दण्ड-स्तस्य निर्वासनं पुरात्। ललाटे चाभिशस्ताङ्कः प्रयाण-ङ्गर्दभेन च" इति। परद्रव्यापहरणरूपसाहसस्वरूपं तत्र च दण्डमाह याज्ञवल्क्यः "सामान्यद्रव्यप्रसभहरणं साहसं स्मृतम्। तन्मूल्याद्द्विगुणो दण्डो निह्नवे तु चतुर्गुणः" इति। बहुभिर्जनैः प्रहरादिकालङ्घनेन रक्ष्यमाणस्य द्रव्यस्य बलात्कारेण हरणं साहसरूपं ज्ञेयमिति पूर्वार्द्धार्थः। तन्मूल्यादपहृतद्रव्यमूल्यात्। निह्नवे अपलापे। यः साहसं करोति तद्द्विगुणान्दमम्। यस्तु साहसं कृत्वा निह्नुते स चतुर्गुणान्दाप्य इत्युत्तरार्द्धार्थः। साहसिकस्य प्रयोजयितारं प्रत्याह स एव "यः साहसं कारयति स दाप्यो द्विगुणन्दमम्। यश्चैवमुक्त्वाऽहन्दाता कारयेत्स चतुर्गुणम्" इति। द्विगुणन्दमं साहसिकदण्डाद्द्विगुणं दण्डम्। साहसिकविशेषं प्रत्याह स एव "अर्घ्याक्रोशातिक्रम-कृद्भ्रातृभार्य्याप्रहारदः। संदिष्टस्याप्रदाता च समुद्र-गृहभेदकृत्। सामन्तकुलिकादीनामपकारस्य कारकः। पञ्चाशत्पणिको दण्ड एषामिति विनिश्चयः। स्वच्छन्द